Roll No. ..............................

# E–3509

# M. A. (Final) EXAMINATION, 2021

SANSKRIT

Paper Eighth

(साहित्यसिद्धान्त)

*Time : Three Hours* ] [ *Maximum Marks : 100*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. (अ) केऽपि द्वे कारिके व्याख्येये— 10

(i) धर्मादिसाधनोपायः सुकुमारक्रमोदितः।

काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥

(ii) शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥

(iii) शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।

अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥

P. T. O.

(iv) वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।

यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥

(ब) आचार्य कुन्तकमतानुसारं काव्यलक्षणं सोदाहरणं व्याख्यायताम्। 10

अथवा

का नाम वक्रोक्तिरिति समीचीनं समालोच्यताम्।

2. (अ) केऽपि द्वे कारिके व्याख्येये— 10

(i) काव्यस्यात्मा स एवार्थस्तदा चादिकवेः पुरा।

क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥

(ii) शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।

वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्॥

(iii) यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥

(iv) वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।

व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥

(ब) 'काव्यस्यात्मा ध्वनिरिति' विषयं सम्यक् विवेचयत। 10

अथवा

आनन्दवर्धनानुसारं प्रतीयमानं अर्थं निरूप्यताम्।

3. (अ) अधस्तनेषु कमपि द्वयं सप्रसङ्गं व्याख्यायताम्— 10

(i) चित्रोदाहरणैर्गुर्वी ग्रन्थेन तु लघीयसी।
इयं नः काव्यमीमांसा काव्यव्युत्पत्तिकारणम्॥

(ii) भवति प्रथयन्नर्थं लीनं समभिप्लुतं स्फुटीकुर्वन्।
अल्पमनल्पं रचयन्नल्पं च शास्त्रकविः॥

(iii) यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्त्तते।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ॥

(iv) प्रतिभातारतम्येन प्रतिष्ठा भुवि भूरिधा।
भावकस्तु कविः प्रायो न भजत्यधमां दशाम्॥

(ब) निम्नलिखितेषु कौचिद् द्वौ गद्यांशौ सम्यक् विविच्यताम्— 10

(i) 'उपकारकत्वादलङ्कारः सप्तममङ्गम्' इति यायावरीयः।

(ii) शब्दार्थौ ते शरीरं, संस्कृत मुखं, प्राकतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम्।

(iii) या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविद्यमधिहृदयं प्रतिभासयति सा प्रतिभा।

(iv) तस्मात्तुल्यप्रभावावेव शास्त्रकाव्यकवी।

4. केषाञ्चित् चतुर्णां व्याख्या विधेया— 20

(i) वाक्यौचित्यम्

(ii) अलङ्कारौचित्यम्

(iii) रसौचित्यम्

(iv) कारकौचित्यम्

(v) कालौचित्यम्

(vi) तत्त्वौचित्यम्

(vii) स्वभावौचित्यम्

(viii) नामौचित्यम्

5. साहित्यशास्त्रे अलङ्कारसम्प्रदायस्य विभिन्नाचार्याणां योगदानं समीक्ष्यताम्। 20

अथवा

'रीतिरात्मा काव्यस्य' इति कथनं विशदीकुरुत।